**स्योन** पु० स्यून+पृषो० । १धौतकटे (धुकड़ी) अमरटी०भरतः २सूर्य्ये ३किरणे मेदि० । ४सुखे निघण्टुः । ५सुखकरे त्रि० "स्योना पृथिवी नोभवान्वृक्षरा" यजु० ३५अ० २१ ।

**स्रंसन** न० स्रन्स-णिच्-ल्युट् । अर्द्ध्वगतस्याधोनयने पतने युच् । स्रंसनाप्यत्र स्त्री । [२पीलुवृक्षे पु०अमरः ।

**स्रंसिन्** त्रि० स्रन्स-णिनि । १अधःपतनशीले स्त्रियां ङीप्

**स्रंसिफल** पु० स्रंसि फलमस्य । शिरीषवृक्षे शब्दमा० ।

**स्रक** गतौ भ्वा० आत्म० सक० सेट् इदित् । स्रङ्कते अस्रङ्किष्ट

**स्रग्वत्** त्रि० स्रक् माल्यमस्त्यस्य मतुप् मस्य वः कुत्वम् । माल्यवति । विनि । स्रग्वीत्यप्यत्र । उभयत्र स्त्रियां ङीप् ।

**स्रज्** स्त्री सृज्यते सृज-क्विन् नि० माल्ये अमरः ।

**स्रज्वा** स्त्री सृज-वा नेत्त्वम् नि० । १प्रजापतौ २तन्तुसंघाते ३रज्ज्वाञ्च संक्षिप्तसारः ।

**स्रन्स** पतने भ्वा० आत्म० लुङि उ० अक० सेट् उदित् क्त्वा वेट् । स्रंसते इरित् अस्रसत् अस्रंसिष्ट । "नास्रसत् करिणां ग्रैवम्" रघुः । [सते अस्रंसिष्ट ।

**स्रन्स** प्रमादे भ्वा० आ० अक० सेट् उदित् क्त्वा वेट् । स्रं-

**स्रम्भ** विश्वासे भ्वा० आत्म० लृदित् लुङि उ०सक०सेट् उदित् क्त्वा वेट् । स्रम्भते अस्रभत् अस्रम्भिष्ट ।

**स्र(स्रा)व** पु० स्रु-अप् घञ् वा । १क्षरणे अमरः । कर्त्तरि अच् । २निर्भरे हेमच० । [भावे ल्युट् । ३क्षरणे ।

**स्रवण** न० स्रु-ल्यु । १मूत्रजले राजनि० २घर्मे च शब्दर०

**स्रवद्गर्भा** स्त्री स्रवन् गर्भो यस्याः । १दैववशात् पतितगर्भायां गवि अमरः । २तथाभूतस्त्रियाञ्च ।

**स्रवद्रङ्ग** पु० स्रवन् रङ्गो यत्र । पयःपण्यौ (हट्ट) हारा० ।

**स्रवन्ती** स्त्री स्रु-शतृ ङीप् । १नद्याम् अमरः । २ओषधि-भेदे ३गुल्मस्थाने च मेदि० । शतृ । स्रवविशिष्टे त्रि० । स्त्रियां ङीप् ।

**स्रवा** स्त्री स्रु-अच् । १मूर्वायाम् रायमुकु० २क्षरणयुते त्रि०

**स्रष्टृ** पु० सृज-तृच् नित्यमम् । १जगत्कर्त्तरि चतुर्मुखे अमरः २शिवे हला० । ३सर्जनकर्त्तरि त्रि० स्त्रियां ङीप् ।

**स्रस्त** त्रि० स्रन्स-क्त । च्युते पतिते अमरः ।

**स्रस्तर** पु० स्रन्स-तरच् किच्च । आसने शु०त० रघु० ।

**स्राक्** अव्य० स्रु-डाकु । त्वरिते द्रागित्यर्थे अमरः ।

**स्रावक** न० स्रावयति स्रु-णिच्-ण्वुल् । १मरिचे शब्दच० २निःस्रावके त्रि० । [असिस्रीत् ।

**स्रिम्भ** हिंसे भ्वा० प० सक० सेट् उदित् क्त्वा वेट् । स्रिम्भति

**स्रिभ** हिंसे भ्वा०प०सक०सेट् उदित् क्त्वा वेट् । स्रेभति अस्रेभीत् ।

**स्रिव** शोषे अक० दिवा०प० गतौ सक० सेट् उदित् क्त्वा वेट् । स्रीव्यते अस्रेवीत् । [स्रुवत् ।

**स्रु** गतौ सक० क्षरणे अक० भ्वा० प० अनिट् । स्रवति असु-

**स्रुग्दारु** स्रुचे यज्ञपात्राय दारु यस्य । विकङ्कतवृक्षे जटा० ।

**स्रुघ्न** पु०१देशभेदे । स उत्पत्तिस्थानत्वेनास्त्यस्याः अच् गौरा० ङीष् । २सर्जिकाक्षारे स्त्री हेमच० ।

**स्रुच्(चा)** स्त्री स्रु-क्विप् चिट् च वा टाप् । बटपत्राकृतौ विकङ्कतकाष्ठजे बाहुमात्रे यज्ञपात्रभेदे शब्दच० । [स्त्री शब्दच०

**स्रुत** त्रि० स्रु-क्त । १क्षरिते जलादौ २गते च । ३हिङ्गुपत्र्यां

**स्रुव** पुंस्त्री० स्रु-क । १खदिरकाष्ठभवे हस्तमिते यज्ञपात्रभेदे यज्ञपात्रशब्दे दृश्यम् । २सल्लक्याम् ३मूर्वायाञ्च स्त्री मेदि०

**स्रुवावृक्ष** पु० स्रुवायाः साधनं वृक्षः । विकङ्कतवृक्षे (बँइचि) अमरः ।

**स्रू** स्त्री स्रु-क्विप् नि० । १यज्ञपात्रभेदे २निर्भरे च हेमच० ।

**स्रै** विक्लृत्तौ-भ्वा० पर० अक० अनिट् । स्रायति अस्रासीत् ।

**स्रोत** न० स्रु-तन् । स्रोतसि वेगेन स्वतोजलनिःसरणे भरतः

**स्रोतस्** न० स्रु-तसि । १वेगेन स्वतो जलनिःसरणे अमरः । २रेतसि च अर्द्ध्वस्रोताः । ३देहस्यच्छिद्रे च ।

**स्रोतईश** पु० ६त० । समुद्रे हेमच० ।

**स्रोतस्वत्** त्रि० स्रोतोऽस्त्यस्य मतुप् मस्य वः । १स्रोतोयुक्ते २नद्यां स्त्री अमरः ङीप् । [२स्रोतोयुक्ते त्रि० ।

**स्रोतस्विनी** स्रोतस्+अस्त्यर्थे विनि ङीप् । १नद्याम्

**स्रोतोऽञ्जन** न० स्रोतसि यमुनास्रोतो जलसन्निकृष्टसौवीरदेशे भवम् अञ्जनम् । सौवीरदेशजेऽञ्जने अमरः । "वल्मीकशिखराकारं भिन्नं नीलाञ्जनप्रभम् । घृष्टे च गैरिकावर्णं श्रेष्ठं स्रोतोऽञ्जनञ्च तत्" राजनि० । "स्रोतोऽञ्जनं तत्र श्रेष्ठं विशुद्धं सिन्धुसम्भवम् । दृष्टेः कण्डूमलहरं दाहक्लेदरुजापहम् । अक्ष्णो रूपावहञ्चैव सहते मारुतातपौ । नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्" । "अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि । तत्र स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् । स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् । स्रोतोऽञ्जनं भवेत् स्वादु चक्षुष्यं कफपित्तनुत् । कषायं लेखनं स्निग्धं ग्राहि च्छर्द्दिविषापहम् । सिध्मक्षयास्रहृत् शीतं सेवनीयं सदा बुधैः । स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः । किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम्" भावप्र० । [जटा०

**स्रोतोवहा** स्त्री स्रुतस्या वहति सरति वह-अच् । नद्याम्